श्रीमते रामानुजाय नमः

## मणवाळ मामुनिगळ् अरुळिच् सेय्द

## यतिराज विम्शति

### यतिराज विम्शति तनियन्

यः स्तुतिं यतिपतिप्रसादनीं *

व्याजहार यतिराज विंशतिं।

तं प्रपन्नजनचातकाम्बुदं *

नौमि सौम्यवरयोगिपुङ्गवं॥

## मणवाळ मामुनिकळ् अरुळिच् सेय्द

## यतिराज विम्शति

* श्रीमाधवाङ्घ्रिजलजद्वयनित्यसेवा *

प्रेमाविलाशयपराङ्कुशपादभक्तम्।

कामादिदोषहरमात्मपदाश्रितानां *

रामानुजं यतिपतिं प्रणमामि मूर्ध्ना॥ १

श्रीरङ्गराजचरणाम्बुजराजहंसं *

श्रीमत्पराङ्कुशपदाम्बुजभृङ्गराजम्।

श्रीभट्टनाथपरकालमुखाब्जमित्रं *

श्रीवत्सचिह्नचरणं यतिराजमीडे॥ २

वाचा यतीन्द्र मनसा वपुषा च

युष्मत् * पादारविन्दयुगळं भजतां गुरूणाम्।

कूराधिनाथकुरुकेशमुखाद्यपुंसां *

पादानुचिन्तनपरस्सततं भवेयम्॥ ३

नित्यं यतीन्द्र तव दिव्यवपुस्स्मृतौ मे *
सक्तं मनो भवतु वाग्गुणकीर्तनेऽसौ।
कृत्यं च दास्यकरणं तु करद्वयस्य *
वृत्त्यन्तरेऽस्तु विमुखं करणत्रयं च॥ ४

अष्टाक्षराख्यमनुराजपदत्रयार्थ *
निष्ठां ममात्र वितराद्य यतीन्द्र नाथ।
शिष्टाग्रगण्यजनसेव्यभवत्पदाब्जे *
हृष्टाऽस्तु नित्यमनुभूय ममास्य बुद्धिः॥ ५

अल्पाऽपि मे न भवदीयपदाब्जभक्तिः *
शब्दादिभोगरुचिरन्वहमेधते हा।
मत्पापमेव हि निदानममुष्य नान्यत् *
तद्वारयार्य यतिराज दयैकसिन्धो॥ ६

वृत्त्या पशुर्नरवपुस्त्वहमीदृशोऽपि *
श्रुत्यादिसिद्धनिखिलात्मगुणाश्रयोऽयम्।
इत्यादरेण कृतिनोऽपि मिथः प्रवक्तुम् *
अद्यापि वञ्चनपरोऽत्र यतीन्द्र वर्ते॥ ७

दुःखावहोऽहमनिशं तव दुष्टचेष्टश् *
शब्दादिभोगनिरतश्शरणागताख्यः।
त्वत्पादभक्त इव शिष्टजनौघमध्ये *
मिथ्या चरामि यतिराज ततोऽस्मि मूर्खः॥ ८

श्रीमते रामानुजाय नमः

नित्यं त्वहं परिभवामि गुरुं च मन्त्रं *

तद्देवतामपि न किञ्चिदहो बिभेमि।

इत्थं शठोऽप्यशठवद्भवदीयसङ्घे *

धृष्टश्चरामि यतिराज ततोऽस्मि मूर्खः॥ ९

हा हन्त हन्त मनसा क्रियया च वाचा *

योऽहं चरामि सततं त्रिविधापचारान्।

सोऽहं तवाप्रियकरः प्रियकृद्वदेवं *

कालं नयामि यतिराज ततोऽस्मि मूर्खः॥ १०

पापे कृते यदि भवन्ति भयानुताप * लज्जाः

पुनः करणमस्य कथं घटेत।

मोहेन मे न भवतीह भयादिलेशस् *

तस्मात्पुनःपुनरघं यतिराज कुर्वे॥ ११

अन्तर्बहिस्सकलवस्तुषु सन्तमीशम् * अन्धः

पुरस्स्थितमिवाहमवीक्षमाणः।

कन्दर्पवश्यहृदयस्सततं भवामि * हन्त

त्वदग्रगमनस्य यतीन्द्र नार्हः॥ १२

तापत्रयीजनितदुःखनिपातिनोऽपि *

देहस्थितौ मम रुचिस्तु न तन्निवृत्तौ।

एतस्य कारणमहो मम पापमेव * नाथ

त्वमेव हर तद्यतिराज शीघ्रम्॥ १३

वाचामगोचरमहागुणदेशिकाग्र्य *

कूराधिनाथकथिताखिलनैच्यपात्रम्।

श्रीमते रामानुजाय नमः

एषोऽहमेव न पुनर्जगतीदृशस्तद् *

रामानुजार्य करुणैव तु मद्गतिस्ते॥ १४

शुद्धात्मयामुनगुरूत्तमकूरनाथ *

भट्टाख्यदेशिकवरोक्तसमस्तनैच्यम्।

अद्यास्त्यसङ्कुचितमेव मयीह लोके *

तस्माद्यतीन्द्र करुणैव तु मद्गतिस्ते॥ १५

शब्दादिभोगविषया रुचिरस्मदीया *

नष्टा भवत्विह भवद्दयया यतीन्द्र।

त्वद्दासदासगणनाचरमावधौ यस् *

तद्दासतैकरसताऽविरता ममास्तु॥ १६

श्रुत्यग्रवेद्यनिजदिव्यगुणस्वरूपः *

प्रत्यक्षतामुपगतस्त्विह रङ्गराजः।

वश्यस्सदा भवति ते यतिराज तस्मात् *

छक्तस्स्वकीयजनपापविमोचने त्वम्॥ १७

कालत्रयेऽपि करणत्रयनिर्मितातित *

पापक्रियस्य शरणं भगवत्क्षमैव।

सा च त्वयैव कमलारमणेऽर्थिता यत् *

क्षेमस्स एव हि यतीन्द्र भवच्छ्रितानाम्॥ १८

श्रीमन्यतीन्द्र तव दिव्यपदाब्जसेवां *

श्रीशैलनाथकरुणापरिणामदत्ताम्।

तामन्वहं मम विवर्धय नाथ तस्याः *

कामं विरुद्धमखिलं च निवर्तय त्वम्॥ १९

श्रीमते रामानुजाय नमः

* विज्ञापनं यदिदमद्य तु मामकीनम् *

अङ्गीकुरुष्व यतिराज दयाम्बुराशे।

अज्ञोऽयमात्मगुणलेशविवर्जितश्च *

तस्मादनन्यशरणो भवतीति मत्वा॥ २०

इति यतिकुलधुर्यमेधमानैः *

श्रुतिमधुरैरुदितैः प्रहर्षयन्तम्।

वरवरमुनिमेव चिन्तयन्ती * मतिरियमेति

निरत्ययं प्रसादम्॥

**मणवाळ मामुनिगळ् तिरुवडिगळे शरणं**